Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 1 | ISSN : 2582-0095

# माहेश्वरसूत्राणां ब्रह्मवाचकत्वम्

**डॉ0 सन्तोष माझी**
सहाध्यापक:, व्याकरणविभाग:
राष्ट्रियसंस्कृतविद्यालय:, तिरुपति: (आ. प्र.)

**Article Info**
Volume 5, Issue 1
Page Number : 10-15

**Publication Issue :**
January-February-2022

**Article History**
Accepted : 01 Jan 2022
Published : 13 Jan 2022

**सारांश:** – नमोऽस्तु व्याकरणाचार्येभ्य:।। "अस्य महती भूतस्य निश्वसितमेतद्" इत्याम्नायवचनेन ओपौरुषेयाणां वेदवाक्यानां यथावदर्थावगमाय ऋषयो मन्त्रद्रष्टारो लोकानुग्रहपरिपूर्णान्तरङ्गा: शास्त्राणि निर्ममिरे। तेषु वेदपुरुषस्य मुखामिति जेगीयमानं व्याकरणं भुवनतले प्रथते, यच्च भगवता पाणिनिना महता तपसा शशिशेखरं भगवन्तं समाराध्य लब्ध्वा च शिवसूत्राणि निरमायि। "सर्ववेदपारिषद हीदं शास्त्रम्" इति भगवान् भाष्यकार:। आम्नायगानां निखिलानां पदनिकुरम्बाणां व्याक्रियाविषयोऽत्र। सागरोपमस्य शब्दराशे: अष्टभिरध्यायैर्लघुतमै: सूत्रै: ऋषिव्याकार्षीदिति कस्य वा चेत: तेन कर्मणा न चमत्क्रियते।

**मुख्यशब्द:-** माहेश्वरसूत्राणाम्, ब्रह्मवाचकत्वम्, भाष्यकार:, परमेश्वर:, निर्गुण:।

"सोऽयमक्षर समाम्नायो वाक्यसमाम्नाय: पुष्पित: फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशि:। सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते" इति अक्षरसमाम्नायाधिकरणे भाष्यकार: तथा च 'वृद्धिरादैच्' सूत्रे भाष्ये भगवता भाष्यकारेणोक्तम् – "इह शास्त्रे प्रमाणभूत आचार्यो दर्भपवित्रपाणि: शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण" इति। तानि ऋक्तन्त्रव्याकरणे चोक्तं शाकटायनेन – "इदमक्षरच्छन्दो वर्णश: समनक्रान्तं यथाऽऽचार्या ऊचुर्ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्य:, ऋषयो ब्राह्मणेभ्य: तं खल्विममक्षरसमाम्नायम् इत्याचक्षते, न भुक्त्वा न नक्तं प्रब्रूयाद ब्रह्मराशि:" इति । अत्र 'ब्रह्मराशि'रित्यस्य ब्रह्मप्रतिपादको वर्णराशिरर्थ:। तस्मान्नानर्थक्यं माहेश्वरसूत्राणाम्। नन्दिकेश्वरकृतकाशिकायां ब्रह्मवाचकत्वं प्रत्यपादि शिवसूत्राणाम्। तथा हि ढक्कानिनादव्याजेन उपदिष्टानां चतुर्दशसूत्राणां अर्थविशेषमजानन्तो मुनीन्द्रवर्या:, अस्य सूत्रजालस्यार्थं नन्दिकेश्वर एव जानातीति, तं नन्दिकेश्वरं प्रणिपत्य पप्रच्छु:। तेषु पृष्टवत्सु स: कारिकारूपेण सूत्राणां तत्त्वमुपादेष्टुमैच्छत्। ततश्च मङ्गलरूपेण "नृत्तावसाने" इति प्रथमकारिकां वदति। सा च कारिका पूर्वमेव निर्दिष्टास्ति।

अत्र सर्वत्र सूत्रेषु अन्त्यवर्णचतुर्दशम्।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्ट सिद्धये ॥

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

एषु च चतुर्दशसूत्रेषु प्रत्येकस्य सूत्रस्य अन्तिमवर्णः धात्वर्थः। धातुमूलकशब्दशास्त्र-प्रवृत्त्यर्थमिति यावत्। तथा चोक्तमिन्द्रेण – "अन्त्यवर्णसमुद्भूता धातवः परिकीर्तिताः" इति ।

**अ इ उ ण्**[1]

**अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु।**

**चित्कलामि समाश्रित्य जगद्रूप उणीश्वरः॥**[2]

आद्येन सूत्रेण सर्ववर्णानां समस्तभुवनानाञ्च समुद्भवरूपं स्वात्मतत्त्वमुपदिष्टमित्याह।

एवञ्च अः – परमेश्वरः निर्गुणः, इम् – मायामाश्रित्य, उः – व्यापकः सगुणः, ण् – ईश्वर आसीत्। इति सूत्रार्थः सूचितः। अत्र प्रामाण्यम् – "असद्वा इदमग्र आसीत्। ततो वै सदजायत" इति श्रुतिः। असद्ब्रह्म वै सृष्टेः पूर्वं इदमकाररूपाक्षरात्मकमासीत्। ततोऽक्षरादसतो वै सृष्टेः पूर्वम् इदमकाररूपाक्षरात्मकमासीत्। ततोऽक्षरादसतौ वै सगुणमजायत इत्यर्थः। तदुक्तं गीतायाम् – "अक्षराणामकारोऽस्मी"[3]ति।

**अकारं सन्निधीकृत्य जगता कारणत्वतः।**

**इकारः सर्ववर्णानां शक्तित्वात्कारणं मतम् ॥**

**जगत्स्रष्टुमभूदिच्छा यदाह्यासीत्तदाभवत्।**

**कामबीजमिति प्राहुर्मुनयो वेदपारगा॥**

**अकारो ज्ञप्तिमात्रं स्यादिकारश्चित्कला मता।**

**उकारो विष्णुरित्याहुः व्यापकत्वान्महेश्वरः॥**

एभिः श्लोकैः अकारस्थ सृष्टिक्रियाया स्वातन्त्र्यं प्रतिपादयति ।

तथा चोक्तम् –

**स्वप्रकाशपरमात्मवस्तुनो दृश्यमानजगतः सिसृक्षया।**

**कामतः परशिवप्रवेशनं कामबीजमिदमेव निश्चितम्॥ इति ।**

**बीजं बिन्दुद्वयारूढं सार्धयोनिस्वरूपकम्।**

**महाकामकथारूपमात्मानं चिन्तयेत्प्रिये ॥ इति च ।**

उणीश्वरः इत्यस्य उः = व्यापकः ण् ईश्वर आसीदित्यर्थः॥

**ऋऌक्**[4]

**ऋऌक् सर्वेश्वरो मायां मनोवृत्तिमदर्शयत्।**

**तामेव वृत्तिमाश्रित्य जगद्रूपमजीजनत्॥**[5]

---

1 वैयाकरणसिद्धान्तकौमुदी

2 काशिका

3 श्रीमद्भगवद्गीता- 10/33

4 वैयाकरमसिद्धान्तकौमुदी

5 काशिका

ननु वेदान्ते परमेश्वर एक इति निश्चितत्त्वात् मायां किंचित्कलां समाश्रित्य जगद्रूपोऽभूदित्युक्तेः अद्वैतहानिः स्यादित्याशङ्क्य कारिकेयमुक्ता। ऋ – परमेश्वरः, ऌ – मायाख्यां मनोवृत्तिं, क् – अदर्शयत् इत्यर्थः। तामेवाश्रित्य स्वेच्छया जगज्जनयामास इति च। 'ऋ – परमेश्वर' इत्यत्र "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्" इति श्रुतिः प्रमाणम्। ऋतं तत्पदार्थं परं ब्रह्म सत्यमित्यर्थः। तथा च श्रुत्यन्तरमपि – "सोऽकामयत बहुस्यां प्रजायेय" इति श्रीतन्त्रेऽपि – "मम वृत्तिर्मनोरूपं ऌकारः परमेश्वरि" इति। ऋऌवर्णौ यथा तादात्म्यमापन्नौ तथा इत्यर्थः।

**एओङ्**[6]

**एओङ्मायेश्वरात्मैक्यविज्ञानं सर्ववस्तुषु।**
**साक्षित्वासर्वभूतानां स एक इति निश्चितम्॥**[7]

ननु जनयामास इत्युक्ते जन्यजनकभावे अद्वैतहानिरित्याक्षिप्य समाधत्ते एओङ् इति। "तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुमविश्य" इत्यादि श्रुतिरत्र प्रमाणम्। जन्यजनकत्वञ्च स्वस्यैव तद्रूपेण वर्तमानत्वादिति नाद्वैतहानिः। अकारोकाराभ्यां निष्पन्नप्रणवरूपेण ओंकारण सगुणनिर्गुणयोः ऐक्यबोधितेनैव दृष्टान्तेन सर्वत्रैक्यबुद्धौ द्वैतनाशो ध्वनितः। समष्टिव्यष्टिभेदेन पूर्ववर्णयुतद्वितीयस्य तद्युक्ततृतीयस्य च समन्वयबोधकमिदं सूत्रम्। अ – अक्षरात्मकः, इ – मायायुक्तः सन् यः स उ – ज्ञानरूपः प्रज्ञानात्मा सर्ववस्तूनामेकत्वम् अद्वैतोपपत्तिः, न नानात्वं, जन्यजनकत्वं च। स्वयं प्रविश्य तद्रूपेण वर्तत इत्यर्थः। वटबीजन्यायेन च पूर्वं सूत्रद्वयजनितं वर्णपञ्चकमेव सकलजगत्कारणमिति प्रागुक्तम्। उत्तरसूत्रवर्णानामपि तस्मादेव सम्भवः। समष्टिव्यष्टिभेदेषु पूर्ववर्णयुतद्वितीयस्य, पूर्ववर्ण-तृतीयस्य च संयोगजनकमिदं सूत्रम्। समन्वयबोधनमप्येकत्वेनोक्तम्। अत्राप्यपरत्वे सर्ववेदसंमतञ्च।

**ऐ औच**[8]

**ऐ औच ब्रह्मस्वरूपः सन् जगत्स्वान्तर्गतं ततः।**
**इच्छया विस्तरं कर्तुमाविरासीन्महामुनिः॥**[9]

अत स्वात्मभूतस्य परमेश्वरस्य जगत्कारणत्वं कथमित्याशङ्कायां कारिकामिमां वक्ति। ततः स्वान्तर्गतं जगद्विस्तारयितुमिच्छुः ऐ – आदिशक्तियुक्तोऽक्षर इति। पूर्वसूत्रगताकारेकारदीर्घयोगस्यैव ऐकारत्वमेकत्वञ्च। सम्यग्ज्ञानस्वरूपः परमेश्वरो यः स पूर्वसूत्रगत अकारदीर्घ उकारदीर्घस्यैव योगे औकारत्वम्। यः प्रज्ञानात्मा मायाशबलित स आकारो यः स आ उ इत्याविर्भवे। उक्तं च स्वरविमर्शिन्याम् "उकारज्ञानसंयोगात्सर्वसम्भूतिरिष्यते" इति। "प्रणवेन जगद्व्याप्तं मायायामवतिष्ठते" इति च।

**हयवरट्**[10]

**भूतपञ्चकमेकस्माद्धयवरणमहेश्वरात्।**
**व्योमवाय्वम्बुबह्वयाख्यभूतान्यासीत् स एव हि॥**[11]

---

6 वैयाकरमसिद्धान्तकौमुदी

7 काशिका

8 वैयाकरमसिद्धान्तकौमुदी

9 काशिका

10 वैयाकरमसिद्धान्तकौमुदी

11 काशिका

ततः पञ्चभूतानि परब्रह्मणः सकाशादुत्पद्यन्ते इत्यर्थः।

हकाराद्व्योमसंज्ञश्च यकाराद्वायुरुच्यते।
रकाराबन्हिस्तोयंतु वकारादिति शैववाक्।।[12]

“तस्मादा एतस्मादात्मन आकाश सम्भूत आकाशादायु वायोरग्नि अग्जेरापः, अद्भ्य पृथिवी” इति श्रुतेः, एतस्मात् परमेश्वरात् भूतपञ्चकमाकाशादिकं प्रपञ्चकारणमासीत्॥

अत्रास्मिन् सूत्रे भूतपञ्चकमासीदित्युक्तम्। तत्राकाशादिभूतचतुष्टयमेवोक्तं न पृथिवीत्याकांक्षायां यदाधारस्वरूपं समस्तकारणमिति सूत्रान्तरेणावोचत्।

**लण्**[13]

**आधारभूतं भूतानामनादीनाञ्च कारणम्।**
**अन्नाद्रेतस्ततो जीवः कारणत्वाल्लणीरितम्॥**[14]

भूतानां प्राणिजातानामुद्भिज्जस्वेदजजरायुजाण्डजादीनां प्रधानकारणत्वादाधारभूतं पृथिवी।

**ञमङणनम्**[15]

**शब्दस्पर्शौ रूपरसगन्धाश्च ञमङणनम्।**
**व्योमादीनां गुणा ह्येते जानीयात्सर्ववस्तुषु॥**[16]

अन्नपानयानादीनां कारणत्वेन स्थितानां तन्मात्राणामुत्पत्तिः अनेन सूत्रेण वर्ण्यते।

**झभञ्**[17]

**वाक्पाणी च झभञासीत् विराड्रूपं चिदात्मनः।**
**सर्वजन्तुषु विज्ञेयं स्थावरादौ न विद्यते।।**[18]
**वर्गाणां तुल्यवर्णा ये कर्मेन्द्रियपदा हि ते।**
**घढधष् सर्वभूतानां पादपायू उपस्थकः।।**
**कर्मेन्द्रियगणा ह्येते जाता हि परमार्थतः।।**[19]

ततो द्वाभ्यां सूत्राभ्यां कर्मेन्द्रियवर्गमुद्घाटयति। परमात्मनश्चिद्रूपस्य प्राणिजातस्य च झकारभकारौ विराड्रूपं विज्ञेयमित्यर्थः।

**जबगडदश्**[20]

---

12 काशिका
13 वैयाकरमसिद्धान्तकौमुदी
14 काशिका
15 वैयाकरमसिद्धान्तकौमुदी
16 काशिका
17 वैयाकरमसिद्धान्तकौमुदी
18 काशिका
19 काशिका
20 वैयाकरमसिद्धान्तकौमुदी

**श्रोत्रत्वङ्नयनघ्राणजिह्वादीन्द्रियपञ्चकम्।**

**सर्वेषामपि जन्तूनामीरितं जबगडदश्॥**[21]

“वर्गाणां मध्यवर्णोत्थो ज्ञानेन्द्रियगणः स्मृतः" इति वचनात् जबगडदवर्णसम्भवः ज्ञानेन्द्रियगण इति सर्वत्र सर्वेषां प्राणिजातानामेते वर्णाः ज्ञानेन्द्रियाणां जनका इति ज्ञातव्यमित्यर्थः।

**खफछठथचटतव्**[22]

**प्राणादिपञ्चकञ्चैव मनोबुद्धिरहंकृतिः।**

**बभूव कारणत्वेन खफछठथचटतव्।**[23]

**वर्गद्वितीयवर्णोत्थाः प्राणाद्याः पञ्चवायवः।**

**मध्यवर्गत्रयाज्जाता अन्तःकरणवृत्तयः॥**[24]

प्रथमकारिकायां प्राणादीति – प्राणादिपञ्चकमनोबुद्ध्यहंकाराः समुन्मील्यन्ते इत्यर्थः। द्वितीयकारिकायाम् – वर्गद्वितीयेति – एतैरष्टवर्णैः प्राणादि पञ्च मनोबुद्ध्यहंकृतयश्च जगतां कारणत्वे सम्भूता इत्यर्थः।

**कपय्**[25]

**प्रकृतिं पुरुषं चैव सर्वेषामेव निश्चितम्।**

**सम्भूतमिति विज्ञेयं कपाभ्यामिति निश्चितम्॥**[26]

ततः सर्वप्राणिकारणत्वेनाद्यन्तवर्गदयाक्षरग्रहणेन सम्पुटीभावं प्रकृतिपुरुषाभ्यां प्रकाशयति प्रकृतिमिति। ककारपकारजातौ प्रकृतिपुरुषावित्यर्थः।

**शषसर**[27]

**सत्वं रजस्तम इति गुणानां त्रितयं पुरा ।**

**समाश्रित्य महादेव शणसर् क्रीडति प्रभुः ॥**[28]

**शकाराद्राजसं रूपं षकारात्तामसोद्भवः।**

**सकारात्सत्वसम्भूतिरिति त्रिगुणसम्भवः॥**[29]

आभ्यां श्लोकाभ्यां अवस्थात्रयं निरूपितम्। पुरा सृष्टेः प्राक् शषसवर्णसम्भूतान् सत्वरजस्तमोगुणानाश्रित्य परब्रह्म सर्वभूतेषु क्रीडति स्म इत्यर्थः। क्रमेण शषसवर्णैः राजसतामससात्विकगुणाः सम्भूताः॥

---

21 काशिका

22 वैयाकरमसिद्धान्तकौमुदी

23 काशिका

24 काशिका

25 वैयाकरमसिद्धान्तकौमुदी

26 काशिका

27 वैयाकरमसिद्धान्तकौमुदी

28 काशिका

29 तत्रैव

**हल्[30]**

**तत्त्वातीतः परः साक्षी सर्वानुग्रहविग्रहः।**

**अहमात्मा परो हल् स्यादिति शम्भुस्तिरोदधे॥[31]**

सर्वतत्त्वजनकः स्वयं तत्त्वातीत इति ज्ञापनार्थमिदं सूत्रम्॥ सर्वानुग्रहविग्रहः साक्षी तत्त्वातीतो हल् स्यादिति ढक्कानिनादव्याजेन सर्वेषां मुनिजनानां तत्त्वमुपदिशन् परमेश्वरः तिरोदधे इत्यर्थः॥

एवं च उपमन्युकृततत्त्वविमर्शिन्याख्यव्याख्यासहिता नन्दिकेश्वरकृतकाशिकान्तर्गताः कारिकाः अत्र सङ्गृहीताः। एतावता शिवसूत्राणां ब्रह्मबोधकत्वमनादित्वमपौरुषेयत्वं च सिध्यति। इदं चतुर्दशसूत्र्यात्मकं शास्त्रं वेदशास्त्रपुराणरूपायाः सकलवाचो विषयः। अतः सर्ववेदाध्ययनजन्यपुण्यफलस्य, चित्तशुद्धिरूपस्य प्राप्तिरस्य ज्ञानेऽध्ययनमात्रे भवति तस्मात् न केवलं शास्त्रप्रक्रियानिर्वाहाय, अपि तु ब्रह्मज्ञानप्राप्तयेऽपि अयमक्षरसमाम्नायः उपकारको भवति तस्मान्नानर्थक्यमेतेषां सूत्राणामिति शिवम्॥

**सहायकग्रन्थसूची**


1. **अष्टाध्यायीसहजबोधः** – पुष्पा दीक्षित, पाणिनीयशोधसंस्थान, छत्तीसगढ, 2004.
2. **काशिका,** चौखम्बा संस्कृत पुस्तकालय, बनारस–1, 2001.
3. **निघण्टु**, यास्कः, श्रीमत्स्वामिदयानन्दसरस्वरीकृतशब्दानुक्रमणिकया सहितः, वैदिक पुस्तकालय अजमेर.
4. **पाणिनीय अष्टाध्यायीसूत्रपाठः** सम्पा–कृष्णदास अकादमी वारणसी,पं सत्यनारायणशास्त्री खण्डुडी, 2012
5. **प्रौढमनोरमा**, (प्रथमो भागः)भट्टोजिदीक्षित, सम्पा.–श्रीसीतारामशास्त्री, काशी हिन्दू विश्वविद्यालयः, वाराणसी, वैक्रमाब्द – 2021
6. **भूषणसार-परमलघुमञ्जुषयोः सिद्धान्तानां समीक्षा**,डा.राममनोहरमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
7. **लघुशब्दन्दुशेखरः**, नागेशभट्टः, चौखम्बासंस्कृतप्रतिष्ठानदिल्ली – 2001.
8. **लघुशब्देन्दुशेखरः**, वाराणसी, चौखम्बा विद्याभवन, हरिनारायण तिवारी, सम्पा. – 2014.
9. **व्याकरणमहाभाष्यम्,**चौखम्बा संस्कृतप्रतिष्ठान, दिल्ली, 2021.
10. **वाक्यपदीयम् (ब्रह्मकाण्डम्)**, भर्तृहरिः, चौखम्बा विद्याभवन, वाराणसी, 2006.
11. **वैयाकरणभूषणसारः**, कौण्डभट्टः, चोखम्बासंस्कृतसिरीज्, वाराणसी, 1969.
12. **वैयाकरणसिद्धान्तकौमुदी**, (संश्रिगिरिधरशर्मा, म. म (मोतीलाल बनारसीदास, देहली, 1997.
13. **वैयाकरणसिद्धान्तकौमुदीतत्त्वबोधिनीसहिता**, चौखम्बा विद्याभवन, वाराणसी, 2006.


---

30 वैयाकरमसिद्धान्तकौमुदी

31 काशिका